श्रीगणाधिपतयेनमः॥श्रीगुरुचरणारविंदाभ्यांनमः॥स्मृत्यर्थसारंहेमाद्रिंमाधवंनिर्णयामृतं॥वीक्ष्यनिर्णयसिंधुंचस्मृ
तिदर्पणमादरात्॥१॥निर्णयोदन्वतःसारमुक्तोद्धारंकरोम्यहं॥राघवोविदुषांप्रीत्यैनिर्णयोद्धारनामकं॥२॥तत्र
तिथिर्द्विधा॥शुद्धाविद्धाच॥तत्रशुद्धासंपूर्णत्वान्निर्णयानर्हा॥तिथ्यंतरयुताविद्धा॥वेधस्तुसायंप्रातस्त्रिमुहूर्तात्म
कः॥केचित्द्विमुहूर्तोप्युक्तः॥प्रातरेव॥तत्रसौरमानंसमाश्रयेत्॥तिथिविशेषेवेधउपवासादिरिक्ते॥तद्यथावच
नं॥नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा॥भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरांतिथिं॥१॥स्वस्वकर्मकाल
व्यापिनीतिथिर्ग्राह्या॥एकभक्तेमध्यान्हव्यापिनीग्राह्या॥मध्यान्हःपंचधाविभक्तदिनेतृतीयभागः॥उभयदिन
व्याप्तावाव्याप्तौवापूर्वैवेतिमाधवः॥उभयदिनव्याप्त्यभावेचपूर्वा॥नक्तव्रतेचप्रदोषव्यापिनीग्राह्या॥०॥स्ताऽनं
तरंत्रिमुहूर्तःप्रदोषः॥द्विमुहूर्तइतिकेचित्॥दिनद्वयेप्रदोषव्याप्तावव्याप्तौवापरैवप्रदोषःकश्चित्द्विमुहूर्तोप्यु
क्तः॥शुक्लप्रतिपदपराह्णव्यापिनीग्राह्या॥तदभावेसायान्हव्यापिनीग्राह्येतिमाधवः॥कृष्णप्रतिपत्परा॥द्वितीया
तुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः॥तृतीयातुरंभातिरिक्तासर्वापिपरैव॥गौरीव्रतेशुद्धामपिपूर्वांत्यक्त्वामुहूर्तमा
त्रापिपरैवग्रा॥ह्येतिमाधवाचार्यः॥चतुर्थ्यपिगणेशव्रतातिरिक्तासर्वापरैव॥गणेशव्रतेतृतीयायुक्ताग्राह्या॥
सामध्यान्हव्यापिनीचेत्ग्राह्येतिमाधवः॥परदिनेतथात्वेपरा॥उभयदिनेमध्यान्हव्यापित्वेपिपूर्वा॥दिनद्वये
मध्यान्हव्याप्तावव्याप्तौवापूर्वा॥अन्यथापरैवेतिमाधवः॥गौरीव्रतेपूर्वा॥अन्येषुदिनद्वयेमध्यान्हव्याप्ताव ३ २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पिपूर्वैवरामकौतुके। निर्णयसिंधौ च॥ संकष्टचतुर्थी संकष्टाख्या चंद्रोदयेग्राह्यायुक्तंदिनद्वयेतथात्वेतदभावेवापूर्वैव॥ पं
चमीतुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः॥ सर्वापिपूर्वैवेतिमाधवः॥ नागविद्धेनपरा ऽअन्यथापूर्वैवेतिनिर्णयसिंधुः॥ ष
ष्ठीस्कंदविद्धा ऽनिरिक्तासर्वापिपरैव॥ सप्तमीसर्वापिसर्वमतेपूर्वैव॥ अष्टमीतुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः॥
शिवशक्त्युत्सवेकृष्णापिपरैव॥ नवमीसर्वापिसर्वमतेपूर्वैव॥ दशमीहेमाद्रिमतेपरापूर्वावाकृष्णापूर्वाशुक्लो
त्तरेतिमाधवः॥ कमलाकरस्तद्वेधाअपिनवमीयुक्तेत्याह॥ नवमीयुतायाअसंभवेओदशीग्राह्येतिनि यि
र्णयामृतः॥ अथैकादशीनिर्णयः॥ साद्विधाशुद्धाविद्धाच॥ तत्रशुद्धाहिसमन्यूनाधिकभेदेनत्रिधा॥ इयमपिद्वादशीन्यू
नसमाधिकपक्षेणप्रत्येकंत्रिधा॥ एवंनवभेदाः॥ विद्धायाअपिएवमेवमष्टादशभेदाः॥ यथा॥ शुद्धसमद्वादशी
समा॥१॥ शुद्धसमा॥ पंचपंचउषःकालःसप्तपंचा ऽरुणोदयः॥ अष्टपंचभवेत्प्रातःशेषःसूर्योदयःस्मृतः॥ द्वा
दश्यूना॥२॥ शुद्धसमद्वादश्यधिका॥३॥ शुद्धन्यूनसमद्वादशिका॥४॥ शुद्धन्यूनान्यूनद्वादशिका॥५॥ शुद्ध
न्यूनाधिकद्वादशिका॥६॥ शुद्धाधिकसमद्वादशिका॥७॥ शुद्धाधिकन्यूनद्वादशिका॥८॥ शुद्धाधिकाधि
कद्वादशिका॥९॥ विद्धसमसमद्वादशिका॥१०॥ विद्धसमन्यूनद्वादशिका॥११॥ विद्धसमाधिकद्वादशिका॥१२॥ विद्धन्यू
नसमद्वादशिका॥१३॥ विद्धन्यूनन्यूनद्वादशिका॥१४॥ विद्धन्यूनाधिकद्वादशिका॥१५॥ विद्धाधिकसमद्वादशिका॥१६
विद्धाधिकन्यूनद्वादशिका॥१७॥ विद्धाधिकाधिकद्वादशिका॥१८॥ तत्रादौवैष्णवनिर्णयः॥ सूर्योदयात्पूर्वंमुहूर्तद्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

याधिकंप्रविष्टैकादशीशुद्धा ॥ षट्पंचाशत् ५६ घटिकानंतरं कलयापि दशमीप्रवेशे विद्धा ॥ तत्रविद्धातुसर्वैषैवत्याज्येव ॥ शु
द्धाभेदेषुतृतीयषट्सप्ताष्टमनवमपक्षेषुपरैवोपोष्या ॥ अन्येतुपूर्वैवेतिमाधवकमलाकरौ ॥ अथस्मार्तनिर्णयः ॥ तत्र
सूर्योदयेदशमीसद्भावे विद्धाऽन्यथाशुद्धा ॥ तत्रशुद्धभेदेषुशुद्धसमाधिं षट्पक्षेषुपूर्वैवोपोष्येतिमाधवनिर्णयामृतक
मलाकरादिबहुमतं ॥ तृतीयषट्पक्षयोः सर्वैरप्युत्तराग्राह्येतिहेमाद्रिः ॥ एतद्वैष्णवपरमितिकमलाकरः ॥ सप्ताष्टमभे
दयोः गृहस्थैः सकामैश्चपूर्वा ॥ यतिवानस्थविधवाभिरुत्तराग्राह्या ॥ अष्टमभेदे विष्णुप्रीतिकामैरुपवासद्वयंकार्यमि
तिहेमाद्रिकमलाकरौ ॥ नवमभेदेतुसर्वेषांपरैव दशमैकादशभेदयोर्गृहस्थैः पूर्वा यतिविधवाभिरुत्तराग्राह्या
द्वादशपक्षेसर्वेषांपरैव ॥ त्रयोदशेमाधवनिर्णयामृतमतेसर्वेषांपूर्वा ॥ कमलाकरस्तुमुमुक्षूणांपुत्रवतांचपरा ॥
2 अन्येषांपूर्वैवत्याह ॥ चतुर्दशपक्षेतुपूर्वैव ॥ तत्रापिमुमुक्षूणांपराऽन्येषांपूर्वैवेतिमदनरत्ने ॥ पंचदशपक्षेहेमाद्रिमा
धवमतेपरा ॥ निर्णयामृतमदनरत्नमतेपूर्वा ॥ षोडशपक्षेसर्वेषांपूर्वैवेतिकमलाकरः ॥ निर्णयामृतमतेपरा ॥ मा
धवमतेगृहस्थैः पूर्वा यतिविधवावनस्थैः पूर्वैवोपोष्या ॥ सप्तदशपक्षेमोक्षपापक्षयविष्णुप्रीतिकामैर्यतिवानस्थ
विधवाभिः पराग्राह्या ॥ गृहस्थैः पूर्वैव गृहस्थेनतत्कंकार्यमितिकमलाकरः ॥ अष्टादशपक्षेसर्वेषांपरैव ॥ वेध
संपूर्देहे ज्योतिर्विद्धिप्रतिपत्तौवापरेतिकेचित् ॥ तद्वैष्णवपरमितिकमलाकरः ॥ एकादश्यांपित्रोःश्राद्धसति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नत्कृत्वापित्र्ययज्ञशेषमाजिघ्रेदितिहेमाद्रिमाधवादयः॥ द्वादशी यदाऽल्पा दा माध्याह्निकी क्रियामपकृष्य कृत्वाप्रा
न्तरेव पारणं कार्यमिति देवलः॥ संकटे श्राद्धप्रदोषप्रनादौ जलेन पारणं कुर्यादिति च॥ द्वादश्याः प्रथमः पादो हरि
वासरसंज्ञकस्तं वर्जयेत्॥ इत्येकादशीनिर्णयः॥ द्वादशी पक्षद्वयेसर्वमते पूर्वैव॥ त्रयोदशी सर्वमते शुक्ला पू
र्वा कृष्णोत्तरा॥ चतुर्दशी सर्वमते कृष्णा पूर्वा शुक्लोत्तरा॥ पक्षद्वयेप्युपवासे परेति मदनरत्ने॥ मासशिवरात्रिव्रते
हेमाद्रिमते बहुरात्रिव्यापिनी ग्राह्या प्रदोषव्यापिनीति केचित्॥ निर्णयसिंधौ प्रदोषनिशीथोभयव्याप्त्यभाव
व्याप्तौ उक्तं माघशिवरात्रिव्रतनिर्णयवदित्युक्तं॥ साम्ये पूर्वा॥ अमापूर्णे तुलादानपितृदेवप्रीत्यर्थोपवासादौ प
रैव ग्राह्येति॥ श्राद्धेऽमावास्या साग्निके त्रिधा विभक्तदिनस्य तृतीयभागे पराह्णे तद्व्यापिनी ग्राह्या॥ दिनद्व
ये तत्सत्वे सर्वा पराह्णव्याप्त्या दिनद्वये पराह्णव्याप्त्यादौ त्रिमुहूर्ता चेत्पूर्वा॥ निरग्निके तु कुतपकालव्यापिनी
साम्ये तिथिसति वृद्धौ ग्राह्या॥ अपराह्णव्यापिनी मुख्या सर्वेषां॥ तिथिसाम्ये तिथिवृद्धौ च परा तिथिक्षये पूर्वा॥ तिथि असाम्ये
धिका दिनद्वयेऽपराह्णस्पर्शे कुतपकालव्यापिनी ग्राह्येति माधवः॥ दिनद्वये कुतपकालव्याप्तौ परा॥ कुतपस्तु पंच
दशधा विभक्तदिनस्याष्टमो भागो इति माधवस्त्वर्थसारादयः॥ यागकालस्तु पर्वणश्चतुर्थभागः प्रतिपदाद्यभागत्र
यं च॥ तत्र मध्याह्ने न त्वर्वाक् पर्वप्रतिपदोः संधौ तद्द्वयागः॥ अग्राह्नो द्वेधा विभागः॥ मध्याह्नादूर्ध्वं संधौ परेह्नि या
५ अपराह्णयाग्यभावेंशतो [illegible] पूर्वैवेति हेमाद्रिः॥ दिनद्वये ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गइतिमाधवः॥हेमाद्रिमतेपरदिनेप्रतिपच्चतुर्थचरणेसतिद्वितीयात्तुक्षयगतासा पूर्वेऽन्हियागः अन्यथापरस्मिन् चंद्रोद
यदिनेयोगोनिषिद्धः॥अपराह्नसंधौचतुर्थचरणेपियागइतिमाधवः॥एतस्मौर्णिमापरमितिकमलाकरः॥संग
वाहूर्ध्वमध्यान्हात्प्राग्यदासंधिःसापौर्णमासीसद्यस्कालविद्धा॥ ॥अमायांविशेषः॥प्रतिपदिसायंद्वितीयांस्ति
मुहूर्तस्पर्शेचतुर्दश्यामन्वाधानंवौपसनेयिनांसंधिदिनेऽन्वाधानंपरेन्हियागइतिमाधवः॥नेतिकमलाकरः॥तैत्तिरीया
नांचंद्रदर्शनेयागः॥एवंनिरग्निकानांस्मार्ताग्निस्थालीपाकेपि॥संधिनिर्णयस्तुमदनपारिजातेउक्तः॥एतदुक्तं
भवतीत्यपरक्षस्यसूर्योदयानंतरभाविन्योयाःपर्वप्रतिपद्घटिकाःएकीकृत्यद्वेधाविभज्यार्धपूर्वदिनेऽर्धंपर
दिनेऽर्धंयोज्यमितिकौस्तुभादौ तु संपूर्णपर्वसंपूर्णप्रतिपदंचैकीकृत्यप्रतिपद्दशघटिकाई पर्वणियोज्यं
न्यूनंचन्यूनंकृत्वासंधिनिर्णयइति॥पिंडपितृयज्ञस्तुकात्यायनानांयागदिनात्पूर्वदिने॥आश्वलायनानांशेषपर्वणि
खंडतिथौतुपूर्वदिनेऽन्वाधानंकेवलंपार्वणश्राद्धंचविधायाऽपरेद्युःपर्वांतेस्थालीपाकंकृत्वाऽपराह्णेपितृयज्ञःकार्यइ
तिदिक्॥इत्यमावास्या॥अथग्रहणनिर्णयः॥तत्रसूर्यग्रहणंयस्मिन्यामेभवेत्तस्मात्पूर्वयामचतुष्टयंनाश्नीयात्॥
चंद्रग्रहणेतुयामत्रयं॥बालवृद्धातुराणांतुग्रहणप्रहरात्पूर्वयाममात्रंनिषिद्धं॥चंद्रोपरागेग्रस्तोदयेदिवानाश्नी
यादितिमाधवः॥ग्रस्तास्तेतुमुक्तिंदृष्ट्वाऽश्नीयात्॥सूर्यग्रस्तास्तेतूपवासः॥पुत्रवान्ग्रहणप्रहरात्प्रा
क्प्रहरद्वयंहित्वाभुंजीतोऽद्यान्नोपवसेद्दिनेहेमाद्रिः॥पुत्रवानपिनाश्नीयादितिमाधवस्तद्युक्ततरं॥यद्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॰ तुलायांप्राग् पंचदश १० ॥ मि ॥ वृश्चिके पूर्वाः षोडश १६ धनुषि पराः षोडश १६ ॥ ६

कृष्णैकादशीवत् ॥ पुत्रवान् किंचिद्भक्ष्यं प्रकल्पयेत् ॥ नैव भुंज्यादिति मयूरे नीलकंठः ॥ ग्रहणांते ग्रहणदिने वा उपवासो महाफलः ॥ ग्रस्तमाने स्नानं ग्रस्ते होमः मुच्यमाने दानं मुक्ते स्नानं च ॥ रजस्वलाप्युद्धृतवारिणा स्नायान्न तीर्थादाविति विज्ञानेश्वरः ॥ अन्योंबृ दिक्षया शौचे पि स्नातामाश्राद्धादि कुर्यादिति माधवकमलाकरौ ॥ तद्दिने प्रत्याब्दिके सति नद्यस्यमाना ॥ न्नेना ॥ मेन वा कुर्यात् ॥ ग्रहणानिमित्तं श्राद्धं नैव दर्शादिश्राद्धा-त्सिद्धिः ॥ इति ग्रहणनिर्णयः ॥ अथ संक्रांतिनिर्णयः ॥ मेषसंक्रमे प्राक् ऊर्ध्वं दश १० नाड्यः पुण्यकालाः ॥ वृषे पूर्वाः षोडश १६ मिथुने पराः १६ ॥ कर्के पूर्वास्त्रिंशत् ३० सिंहे पूर्वाः षोडश १६ कन्यायाः पराः षोडश १६ मकरे हेमाद्रिमते पराश्चत्वारिंशत् ४० माधवमते विंशतिः २० परे कुंभे पूर्वाः षोडश १६ मीने पराः षोडश १६ इति दिनसंक्रांतौ ॥ सायंसंक्रांतौ तु यत्रोत्तरतः पुण्यकालस्तत्रापि नावेन्मितः पूर्वमेव ॥ यत्र प्रागुक्तस्तत्रापि प्रातःसंक्रांतौ तावन्मितः परतः उदयानंतरमेव निशीथादर्वाक् चेत्तदा पूर्वमेव दिनं पुण्यं ॥ निशीथानंतरं चेत्तदा परदिन एव ॥ निशीथ एव चेत्तदा दिनद्वयं पुण्यं ॥ यदास्तात्पूर्वसमये कर्कमकरे संक्रांतिस्तत्तदा हेमाद्रिमाधवमते च पूर्वमेव पुण्यं ॥ रात्रौ प्रदोषे निशीथे वा मकरसंक्रांतौ माधवमते द्वितीयदिन एव पुण्यं ॥ हेमाद्रिसमयसारमते निशीथात्पूर्वं पश्चाद्वा संक्रांतौ दिनांते दिनोदये च संक्रमे पंच पंच नाड्यः पुण्याः ॥ निर्णयसिंधौ तु प्रदोषे र्द्धरात्रे वा मकरसंक्रांतौ परदिने प्रातः पंच नाड्यः पुण्याः ॥ निशीथानंतरमुदयं यावत् कर्कसंक्रांतौ दिनांते पूर्वदिने पंच नाड्यः पुण्याः ॥ एतत्पुण्यातिशयद्योतनार्थमि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

३

तिविरोधंपरिहृतः॥इतिसंक्रांतिनिर्णयः॥अथमासक्रमेणविशेषतिथयोनिर्णीयंते॥चैत्रसितप्रतिपदुदयव्यापिनीग्रा
ह्या॥दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वैव॥चैत्रनवरात्रेतुद्वितीयायुतैवग्राह्या॥तिलतैलाभ्यंगः॥अपाहानं च॥
शुक्लतृतीयागौरीव्रतेमुहूर्तमात्रापिपरैवग्राह्या॥इयंचमन्वादिरपि॥मन्वादयःसिताःसर्वाःपौर्वाह्णिकाःकृष्णाः
अपराह्णगाइतिहेमाद्रिः॥चैत्रशुक्लनवमीरामनवमीइयंचमध्याह्नव्यापिनीग्राह्या॥दिनद्वयेतत्सत्त्वेतदभा
वेवापुनर्वसुयुतामपिपूर्वांत्यक्त्वासर्वमतेपरैवग्राह्या॥इयमादिनेकादशीवत् द्वैधस्मार्तैःपूर्वावैष्णवैस्तूत्तरेति
निर्णयसिंधुः॥शुक्लचतुर्दशीकुलधर्मदमनार्पणादौपूर्वैवसायंकालव्यापिनीग्राह्येतिमाधवः॥तदुक्तिसा
यं[illegible]परं॥पूर्वदिनेसायंत्रिमुहूर्तवेधाभावेपरेतिकमलाकरः॥चैत्रपौर्णमासीतुत्रिमुहूर्ताचेत्सैवपरैव॥अ
न्यथापूर्वा॥इतिचैत्रमासः॥अथवैशाखमासः॥वैशाखशुक्लतृतीयापूर्वाह्णव्यापिनीग्राह्या॥दिन
द्वयेतद्व्याप्तौपरैव॥गौरीव्रतेमुहूर्तमात्रापिपरैव॥इयंयुगादिरपि॥माघेपंचदशीकृष्णानभस्येचत्र
योदशी॥तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयइतिवचनं॥एताःपूर्वाह्णगाग्राह्याः उदयव्यापि
न्यइति॥युगादिर्मन्वादिश्चश्राद्धेषुशुक्लाउदयव्यापिनीकृष्णापराह्णव्यापिनीग्राह्येतिस्मृत्यर्थ
सारः॥दिनद्वयेतद्व्याप्तौपरैवेतिहेमाद्रिः॥निर्णयामृतकालादर्शेतुश्राद्धवदपराह्णइत्याहतुः॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ना तद्दिवानीं तद्दिने छंति ॥ इयं परशुरामजयंति ॥ सा प्रदोषव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा परैव ॥
शुक्लचतुर्दशी नृसिंहजयंती ॥ इयं प्रदोषव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ अंशतः समव्याप्तौ च परा ॥
विशेषव्याप्तावधिकव्याप्तिमती उभयदिनव्याप्तौ चपरा ॥ इति वैशाखमासः ॥ अथ ज्येष्ठमासः ॥ ज्येष्ठी
पौर्णमासी सा सावित्रीव्रते पूर्वविद्धा ग्राह्या ॥ अष्टादशघटिकामिता यदा चतुर्दशी तदा सावित्रीव्रते परेति
माधवः ॥ कमलाकरोनेतत्सहमानः पूर्वैवेत्याह ॥ इति ज्येष्ठमासः ॥ अथाऽऽषाढमासः ॥ आषाढशुक्ले मा
५ दशुक्लद्वादश्यां वा चातुर्मास्यव्रतारंभः कार्यः ॥ शुक्लद्वादश्यामनुराधायाः गतेव्ययोगेन विभागेक्लेन प्रथमभाग
योगरहितायां पारणं कार्यं ॥ अस्यामेव विष्णोः शयनोत्सवः कार्यः ॥ इत्याषाढः ॥ अथ श्रावणः ॥ श्रावणशुक्लतृती या
मारभ्य मासमात्रं कुमारीभिर्गौरी पूज्या सा पित्रिमुहूर्ता चेन्नूपरे निरामको तुके ॥ श्रावणशुक्लचतुर्थ्यामवि
वाहितैः कुमारैः कुमारीभिश्चैकविंशति ग्रंथियुतः सूत्ररूपो गणेशः पूज्य इति सांप्रदायिकाः ॥ इयं नतु
र्थः मध्याह्नव्यापिनी तदभावे त्रिमुहूर्ता चेत्परा अन्यथा पूर्वैव नागचतुर्थः मध्याह्नव्यापिनी एवं पोष्या दिनद्व
ये तथात्वे तदभावे चापरैव ॥ पंचमी नागपूजादौ त्रिमुहूर्ता चेत्परा ऽन्यथा पूर्वैव ॥ एवमेवाऽऽषाढकार्तिकमार्गशी
र्षपंचम्योपि ॥ श्रावणशुक्लचतुर्दशी कुलधर्मपवित्रार्पणादौ पूर्वैव ॥ सायंकालव्यापिनी ग्राह्येति माधवः ॥
विशेषचैत्रशुक्लचतुर्दशीवत् ॥ अत्रैव श्रवणर्क्षे उपाकर्म कुर्यात् ॥ दिनद्वये ऋक्षयोगे स्वतिथनिष्ठायुक्तः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रवणो ग्राह्यः उत्तराषाढस्युक्तो निषिद्धः॥ पूर्वेद्युरुत्तराषाढायोगे परेद्युरपि श्रवणाभावे घटिकाद्वयन्यूने च सं
त्यसुक्तं पंचम्यादौ कार्यं॥ तथैव संक्रान्तिग्रहणशुक्रास्तादावधिमासेपि न कार्यं॥ अशौचग्रहणसंक्रान्तौ ए
रुगुक्रास्तादौ नूतनानामेव पंचम्यादावन्येषां तदैव श्रवणादौ॥ तत्राप्यर्धरात्रोत्तरं ग्रहणादौ श्रवणयुते ए
व कार्यं प्राचीनैः॥ तैत्तिरीयास्तु उदयव्यापिनी पौर्णमास्यां कुर्युः॥ कात्यायनानां तु दिनद्वये सूर्योदयव्याप्तौ वि
देशास्पर्शे वा पूर्वैव तिलहेमाद्रिः॥ निर्णयामृतस्तु यजुः श्रा॥ रविनामोदयि कैश्चित्परोक्तेत्युक्तवान्॥ रामकौतुके तु पूर्वा
ग्राह्येत्युक्तं॥ नूतनब्रह्मचारिणामत्र वृद्धिश्राद्धमुक्तं हरिहरेण॥ ब्रह्मचारिणामन्येषां वा यथाधिकारं वपन
मुक्तमत्र॥ श्रावणीपौर्णिमासी पवित्रारोपणकुलधर्मादौ पूर्वैव॥ अस्यामभ्यंगो नित्यः॥ अस्यामेव भ
द्रारहितायां रक्षाबंधनं कार्यं॥ श्रवणाकर्मण्यस्तसमर्थयोगिनी ग्राह्या॥ खंडशेषपर्वणि वा तुर्यपि॥
श्रावणकृष्णचतुर्थी वार्षिकसंकष्टचतुर्थी गणेशप्रादुर्भावदिनं चैतत्॥ सा चंद्रोदयव्यापिनी ग्राह्या॥
5 दिनद्वये चंद्रोदयसत्त्वे पूर्वैव॥ असत्त्वे कर्मोपक्रमकालव्यापिनीसत्त्वासत्त्वे वेति माधवकमलाकरौ॥
श्रावणकृष्णतृतीया कज्जली सा परा॥ चतुर्थी सापराह्णव्यापिनी दिनद्वये तत्सत्त्वे पूर्वा॥ श्रावण
कृष्णसप्तमी शीतलाव्रते पूर्वा॥ श्रावणकृष्णाष्टम्यर्धरात्रव्यापिनी ग्राह्या॥ उभयेद्युर्निशीथ

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

योगेतदभावेवापरेव॥रोहिणीयोगेनेयंचतुर्द्धापूर्वेद्युरेवनिशीथेरोहिणीयुतापूर्वा॥परेद्युरेव
चेत्परेव॥उभयेद्युश्चेत्परा॥पूर्वेद्युरेवनिशीथेऽष्टमीपरेद्युर्निशीथेऽष्टमीरोहिणीयुतातदापिप
रैवेतिमाधवः॥हेमाद्रिमतेपूर्वा॥कालतत्वविवेचनादयोनव्याअपिपूर्वमेवेच्छंति॥तदाकमला
करस्तूपवासद्वयमवदत्॥यदातुपूर्वेऽह्नि निशीथेरोहिणीपरेऽह्न्यष्टमीनिशीथेतदापरा॥उभयदि
नेनिशीथेऽष्टमीरोहिण्योर्निशीथाऽसंभवेसर्वमतेपरैव॥इयंबुधसोमयुताऽतिप्रशस्ताइतिमा
धवःसंभवेतिथ्यर्क्षच्छेदेपारणंकुर्यादुत्सवांतेवायामत्रयाधिक्येतिथिमध्यएव॥अत्ररात्रावि
पिपारणंकुर्यात्॥यदारात्रौतुसार्धप्रहरोत्तरंनक्षत्रांतस्तदोपवासएव॥श्रावण्यमायांकुशग्रहणं
कुर्यात्॥इतिश्रावणमासः॥अथभाद्रपदः॥भाद्रशुक्लतृतीयाहरितालिकाव्रतेसंपूर्णामपिपूर्वां
त्यक्त्वामुहूर्तमात्रापिपरैवग्राह्येतिमाधवः॥भाद्रशुक्लचतुर्थी वरदाख्यासामध्यान्हव्यापिनी
ग्राह्या॥मध्यान्हस्तु त्रेधाविभक्तदिनांत्यभागाद्याद्यघटीद्वयं॥दिनद्वयेतथात्वेपूर्वा॥दिन
द्वयेतदभावेपरैवेतिमाधवः॥सिद्धिविनायकव्रतेप्ययंनिर्णयोबोध्यः॥भाद्रशुक्लपंचमीऋषि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पंचमीइयंमध्यान्हव्यापिनीग्राह्येतिमाधवीयेहारीतः॥दिनद्वयेतथात्वेपरेतिहेमाद्रिः॥दिनद्वयेमध्या
न्हव्याप्तावव्याप्तौवापूर्वैवेतिमाधवः॥ऋष्युदयेपूजाविधानादुत्तरयोगिनीग्राह्येतिरामकौतुके॥
॥भाद्रशुक्लसप्तम्याममुक्ताभरणव्रतंसापूर्वविद्धाषण्मुन्योरितिवचनात्॥भाद्रशुक्लाष्टमीदू
र्वाख्यासातुपूर्वैव॥इयमेवज्येष्ठापूजनेज्येष्ठायोगवशेनपूर्वापरावाग्राह्या॥दिनद्वययोगे
परा॥प्रतिवार्षिकज्येष्ठाव्रतमष्टम्यामेवकार्यं॥परंतुदाक्षिणात्यास्तुऋक्षएवकुर्वंति॥अ
त्रभाद्रमासाष्टमीज्येष्ठर्क्षयोगोऽतिप्रशस्तइतिमाधवः॥भाद्रशुक्लद्वादश्यांश्रवणमध्या
न्हयोगरहितायांपारणंकार्यं॥एकादश्याःश्रवणयुतद्वादशीयोगेविष्णुशृंखलाख्यायोग
इतिहेमाद्रिः॥निर्णयामृतमतेतुश्रवणस्यैकादशीद्वादश्योर्योगएवनाऽन्यथेति॥निशी
थाऽनंतरंसूर्योदयावधिकलामात्रमपिविष्णुर्क्षंभवतितदापूर्वैव॥उदयव्यापिनीग्राह्येतिस्मृ
6 त्यर्थसारः॥दिनद्वयेउदययोगेपूर्वा॥यद्येकादश्यामेवश्रवणोनद्वादश्यांतदापिपूर्वैव॥य
द्वाद्वादश्येवर्क्षयुतातदापिपरा॥कमलाकरस्तूपवासद्वयमवदत्॥हेमाद्रिस्तुपूर्वमेका
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham
दश्यांस्यात्ततोद्वादश्येवोपोष्येत्याह॥भाद्रशुक्लचतुर्दश्यनंतव्रतंत्रिमुहूर्तव्याप्युदयिकीग्राह्येति

माधवः॥ घटिकामात्राप्योदयिकी ग्राह्येति निर्णयामृतः॥ दिनद्वयेतथात्वे पूर्वा॥ भाद्रपदपौर्णिमास्यां अपितामहास
रांस्त्रीनुद्दिश्य नांदीमुखसंज्ञकं श्राद्धं कार्यं॥ अत्र मातामहानां तु कृतांकृतं॥ अथापरपक्षः॥ तत्रापि पूर्णपक्षका
लः॥ पंचम्यादिषु प्रशस्तः॥ दशम्यादिः॥ तत्रापि मघात्रयोदशी॥ दरिद्रस्य सकृन्महालयः॥ तत्र प्रतिपदा
दिदर्शांतपक्षे नंदादिकं न वर्ज्यं॥ तदाह काष्र्णाजिनिः॥ अथ वचनं॥ नभस्यापरपक्षे तु श्राद्धं कुर्याद्दिने दि
ने॥ नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति॥ यत्तु प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमित्याद्य
वचनं॥ मासांतरे सावकाशतयाव्यवहर्तव्यं॥ माधववचनादिति निर्णयसिंधुः॥ तथापि चतुर्दश्याम
पिंडकं स्मृतं॥ कन्यागते सवितरि दिनानि दश पंच च॥ यान्यहानि तु षोडश साम्येपं चदशे सैकः कल्पः॥
अश्वयुक्शुक्लप्रतिपदासहेति द्वितीयः॥ हेमाद्रौ पूर्वया पौर्णमास्यासहेति तृतीयः॥ अत्र पक्षद्वयं भिन्न
नामिककर्मणां प्रतिदिनं भिन्ना एव प्रयोगा इत्येकः पक्षः॥ एकमेव श्राद्धं प्रतिदिनमावर्तत इत्यपरः॥ आ
द्ये तु प्रतिदिनं दक्षिणा देया॥ उत्तरस्मिंस्तु समाप्तिदिने दक्षिणायास्तु प्रयोगांग त्वात्॥ ब्राह्मणास्तु तएं
य व॥ दशोप्रिस एवेत्यादि विवेचनीयं॥ दरिद्रेण तु एकत्रैकस्मिन्कस्मिंश्चिद्दिने कार्यमिति केचिदाहुस्तन्निर्मू
लं॥ आषाढ्याः पंचमपक्षस्य पंचमीमारभ्यानंतरं पंचमीपर्यंतासु तिथिषु मध्ये अनिषिद्धायां तिथौ क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

६

र्तव्यं ॥ अथ तत्र्यादिनानत्राकरणेऽनुपत्यवल्कन्यागतः सूर्यस्तावदेयं ॥ तत्राप्यकरणे यावद्वृश्चिकदर्शनात् सकृन्
महालये वर्ज्यकालमाह गर्गः ॥ अथ वचनं ॥ नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु ॥ एषु श्राद्धं न कुर्वीत
गृही पुत्रधनक्षयात् ॥ त्रिजन्मनीति जन्मतो नवमे कोनविंशे नक्षत्रे इत्येके ॥ जन्मनक्षत्रात्पूर्वोत्तरमेव त्रिजन्म
नीति शौनकः ॥ तथा कृत्तिकारोहिणीरेवतीमघासु त्रयोदश्यां चतुर्दश्यां च निषिद्धं ॥ अस्यापवादः ॥ स्मार्य
ते वचनं ॥ या तिथिर्यस्य तातस्य मृताहे तु प्रवर्तते ॥ सा तिथिः पितृपक्षस्य पूजनीया प्रयत्नतः ॥ तिथिच्छेदो न कर्त ल
व्यो विनाशौचं यदृच्छया ॥ इति नागरखंडोक्तेः ॥ तत्रापि चतुर्दशी वर्ज्या वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्य
वचनात् ॥ तथा ॥ अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ॥ रं[illegible]के इति पाठः ॥ न तिथिं चन्न नक्षत्रं वारं चानुचि
न्तयेत् ॥ इति हेमाद्रिः ॥ एतत्संक्षेपेण वर्ण्यं नेदं मन्वष्टकाभिन्नं इति निर्णयसिंधौ ॥ जीवत्पितृकेण गर्भिणी
पतिनापि मातुः श्राद्धं सपिंडकमेव कर्तव्यं ॥ तत्र विप्रैः सह सुवासिन्यपि भोज्या ॥ तत्पितृमरणोत्तरमपि
यावज्जीवं कर्तव्यमेव ॥ संन्यासिन्यां द्वादश्यां श्राद्धं कर्तव्यं ॥ विधवा पार्वणं चतुष्टयं स्वयं ब्राह्मणद्वारा वा
7 कुर्यात् ॥ निषिद्धेऽपि प्रत्यहं तिलतर्पणं कुर्यादेव कृतो द्वाहादावपि श्राद्धं तर्पणं च कुर्यादेव ॥ मघात्रयोद
श्यां तु सर्वान् पितॄन् यजेत् ॥ इदं श्राद्धं सपिंडकमेव कार्यं ॥ अपमृत्युहतानामेव चतुर्दश्यां विहितं ॥ तत्र चतुर्द

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नी श्यांशस्त्राहतानामेवेति वाक्यार्थः ॥ एवं पित्रामहादीनां शस्त्रादिहतानामेव तृतीयार्थादिनां तरेपि सकृन्महालयश्रा
द्धं कर्तव्यं ॥ चतुर्दश्यामेकोद्दिष्टमेवसदैवं ॥ यस्य पित्रादिमध्ये कोपि न ॥ द्वौ शस्त्रादिहतौ तेन द्वयोरपि चतु
र्दश्यामेकोद्दिष्टं ॥ यस्य पित्रादित्रयोपि शस्त्रहतास्तेन पार्वणमेव कर्तव्यमिति चंद्रिकाकाराऽपरार्कहेमाद्रि
प्रभृतयः ॥ माधवस्तु देवस्वामिमतात्त्रयाणां मध्ये कोद्दिष्टत्रयमेव वदन् ॥ चतुर्दश्यां कथं विद्धिश्चेत्तु दिनांत
रे पार्वणमेव कुर्यात् ॥ इति भाद्रपदमासः ॥ अथाऽऽश्विनः ॥ आश्विनशुक्लप्रतिपन्मातामहश्राद्धे अपराह्ण
व्यापिन्येव ग्राह्या ॥ संगवव्यापि त्वं तु छं ॥ इदं श्राद्धं जीवत्पितृकस्यापि पिंडरहितं युक्तं प्रतिभाति ॥ अत्रैव नव
रात्राऽऽरंभः कार्यः ॥ तत्रोदये प्रतिपद्द्विमुहूर्ता मुहूर्तमात्रापि परे वा ॥ अमायुक्ता निषिद्धा उभयदिने उ
दयव्यापित्वे पूर्वा ॥ परदिने प्रतिपदोऽत्यंताःसत्वे ऽमायुक्तापि पूर्वा ॥ प्रतिपदः पूर्वाः षोडशनाड्यो निषिद्धाः ॥
अत्र चित्रावैधृत्यादिनिषेधाश्चिंत्या इति नीलकंठः ॥ क्वचित्सकलत्वे संभवे योज्यावा ॥ असंभवे तेषां प्रथ
मांशो वर्ज्यः ॥ न त्वमायुक्ता विद्धा मुहूर्तमात्राधिका सर्वदोषयुतापि ॥ द्वितीयायुतैव ग्राह्या ॥ कलश
स्थापनं तु दिवैव न रात्रौ कदाचित् ॥ इदमारब्धं मृतसूतके कार्यं ॥ अनारब्धेपि पूजाद्यन्येन कारयेत् ॥
व अत्र पूर्वारंभस्तु नर्भस्यैव ॥ शुक्लपंचमी ललिताव्रते पूर्वविद्धा रात्रिव्यापिनी ग्राह्येति हेमाद्रिः ॥ कमलाक
रोप्येवं माधवनिर्णयामृतयोर [illegible] व्यापिनी ग्राह्येत्युक्तं तौ ॥ अ ६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्रैवमूलाद्यपादे पुस्तकपूजनं श्रवणाद्यं येनाविसर्जनं ॥ अत्र नवरात्राऽशक्तौ तु सप्तम्यादित्रिदिनं वा कुर्या
दिति हेमाद्रिः ॥ तत्र सप्तमी षष्ठीयुता पूर्वैव ग्राह्येति दिवोदासः ॥ विधिवस्कप्रतिपत्तु ॥ तत्र सप्तम्युदये घ द्व
टिकामात्रा चेत्परा ऽन्यथा पूर्वैवेति निर्णयसिंधौ देवलादयो ऽन्ये निबंधाश्च युग्मवाक्येना ऽत्र नियामकं ॥
आश्विनशुक्लाष्टमी घटिकामात्रा व्योदयिकी ग्राह्या ॥ कलामात्राप्यष्टमी सप्तमीविद्धा निषिद्धा ॥ परदि
ने ऽष्टमीभावे सप्तमीयुतापि ग्राह्या ॥ पुत्रवतैकरात्रपक्षे ऽष्टमीमुपवासो न कार्यः ॥ नवम्यष्टमीयुता
ग्राह्या ॥ अष्टमी नवमीयुक्ता नवमी चाष्टमीयुतेति युग्मवाक्यात् ॥ इयं सायं त्रिमुहूर्तवेधाभावे निर्विद्धा
पि बलिपूजने परा ॥ होमादि तु नवम्यामेव कार्यं ॥ आचारात्संधौ कुर्वंति ॥ पुत्रवतैकरात्रपक्षे नवम्या
मुपोषणं कर्तव्यं ॥ पारणं तु नवम्यां कार्यमिति निर्णयदीपः ॥ तत्तुच्छमिति कमलाकरनीलकंठौ ॥ नवे
8 हाभिसारिकव्रतकं नृपविषयमिति कमलाकरः ॥ दशम्यामेव पारणं कार्यमिति हेमाद्रिकमलाकरनी
लकंठादयः ॥ पारणाहे मृतजातकसूतकप्राप्तौ होमादि ब्राह्मणद्वारा कारयित्वा पारणं कुर्यादेव ॥ सू
तकांते ब्राह्मणभोजनं दक्षिणादानादि कार्यं सधवाविधवास्त्रीभिरपि रजोदर्शने मध्ये पारणं कार्य
मेव ॥ विजयादशमी प्रदोषव्यापिनी ग्राह्या ॥ दिनद्वये तथात्वे परा ॥ दिनद्वये ऽपराह्णव्यापित्वे पूर्वा ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

परदिनेपराह्णेश्रवणस्पर्शेपरैव ॥ आश्विनपौर्णमास्यामाश्वयुजीकर्मकार्यं ॥ शेषपर्वणीस्तत्रपूर्वाह्ण
व्यापिनीग्राह्या ॥ कौमुदीमहोत्सवेतुपरैव ॥ आश्विनकृष्णद्वादशीगोवत्ससंज्ञासाप्रदोषव्यापिनी
ग्राह्या ॥ दिनद्वयेतथात्वेपूर्वैव ॥ आश्विनकृष्णचतुर्दशीनरकचतुर्दशीतत्राभ्यंगेचंद्रोदयव्यापिनीग्राह्या
॥ दिनद्वयेचंद्रोदयेचतुर्दशीसत्वेतदभावेवाऽरुणोदयगाग्राह्या ॥ अरुणोदयव्याप्तादिनद्वयेतदापू
र्वा ॥ उभयेद्युररुणोदयव्याप्त्यभावेचतुर्दशीह्रासंपूर्वेद्युःप्रदोषत्रयोदशीमध्यएवाभ्यंगंकुर्या
त् ॥ इतिदिवोदासः ॥ तथावचनं ॥ त्रयोदशीयदाप्रातःक्षयंयातिचतुर्दशी ॥ रात्रिशेषेत्वमावा
स्यातदाऽभ्यंगेत्रयोदशीतिचंद्रप्रकाशोज्ञेयः ॥ अत्रस्नात्वाजीवत्पितृकेऽपियमभीष्मतर्पणंकर्त
व्यं ॥ तच्चापसव्येनसव्येनवा ॥ आश्विन्यमायामपिप्रातरभ्यंगंकुर्यात् ॥ प्रदोषेदीपान्दद्यात् ॥
इत्याश्विनमासः ॥ अथकार्तिकः ॥ कार्तिकशुक्लप्रतिपद्बलिपूजनेपूर्वविद्धाग्राह्या ॥ गोक्रीडादौतुसायान्हव्या
पिनी ॥ दिनद्वयेतथात्वेपरा ॥ दिनद्वयेतदभावेपूर्वैव ॥ चंद्रोदयनिषेधाद्यत्रचंद्रोदयःसानग्राह्या ॥ नारी
भिर्नीराजनमंगलमालिकेतुघटिकामात्रामपिद्वितीयायुतप्रतिपदिकार्ये ॥ मुहूर्तमात्रयाप्यमायाविद्धा
निषिद्धा ॥ प्रतिपद्युताग्राह्येतिनिर्णयामृतः ॥ मध्यान्हव्यापिनीग्राह्येतिहेमाद्रिः ॥ उभयेद्युर्मध्यान्हव्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सावव्याप्तौ चाः पराह्णव्यापिनी ग्राह्येति रामकौतुकनीलकंठौ ॥ अस्यां स्वगृहे न भोक्तव्यं भगिनीहस्तादेव
भोक्तव्यं नेतरत्र ॥ भगिन्यसंनिहिते अभावे च कल्पितभगिनीहस्तादेव भोक्तव्यमिति हेमाद्रिः ॥ कार्तिक
शुक्लैकादशीमारभ्य भीष्मपंचकं कुर्यात् ॥ अत्रैव द्वादश्यां रेवत्यंतपादयोगरहितायां पारणं का
र्यं ॥ अत्रैव सायं देवोत्थापनमहोत्सवः कार्य इति हेमाद्रिः ॥ कार्तिकशुक्लचतुर्दशी वैकुंठाख्या सा नि
शीथव्यापिनी ग्राह्या ॥ दिनद्वये निशीथव्याप्तौ प्रदोषनिशीथोभयव्यापिन्येव ॥ विश्वेश्वरप्रतिष्ठ
दिनत्वादियं चतुर्दश्येव अरुणोदयव्यापिनी ॥ अत्रैव कार्तिकव्रतोद्यापनं कर्तव्यं चतुर्दश्यां पौर्ण
मास्यां मिथुनब्राह्मणभोजनं महादानादि कर्तव्यं ॥ तथात्र पौर्णिमा त्रिपुरोत्सवे सायान्हव्यापि
नी ग्राह्या ॥ दिनद्वयेंशतो व्याप्तावुत्तरैव ॥ कार्तिककृष्णाष्टमी कालाष्टमी सा बहुरात्रव्यापिनी
9 ग्राह्या दिनद्वयेंशतो रात्रिव्याप्तावुत्तरैव ॥ इति कार्तिकमासः ॥ अथ मार्गशीर्षः ॥ मार्गशीर्षशुक्लपंच
मी नागपूजने त्रिमुहूर्ता चेत्परा ॥ अन्यथा पूर्वैव ॥ अत्रैव शुक्लषष्ठी पौचंस्या इयमुत्तरा शततारा
रविवारयोगवशेन पूर्वा परा वा ग्राह्या ॥ पौर्णमास्यत्र प्रत्यवरोहणं श्रवणाकर्म वतू ॥ अस्तम
ययोगिनी ग्राह्या ॥ इति मार्गशीर्षमासः ॥ अथ पौषः ॥ पौषशुक्लचतुर्दशी कुलधर्मादौरा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रात्रिव्यापिनी॥ पौषीपौर्णिमा त्रिमुहूर्ता चेत्परान्यथादौ॥ कुलधर्मादौ पूर्वैव॥ इति पौषमासः॥ अथ माघः॥
माघशुक्लसप्तमी रथसप्तमी सा अरुणोदयव्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव॥ अ
मैवाष्टम्यां भीष्मतर्पणमुक्तं तत्तु जीवत्पितृकेणायज्ञोपवीतिनैव कर्तव्यं मृतपितृकेरपसव्येनैव
कार्यं पुत्रकामस्तु श्राद्धं कुर्यात्॥ माघशुक्लाष्टम्यामष्टकाश्राद्धमपराह्णगायां तदनुरोधेन
सप्तमीनवम्योः पौर्णिमादानादावुत्तरा॥ माघकृष्णचतुर्दशी शिवरात्रिः॥ तत्र प्रदोषव्यापिनी
त्वं निशीथव्यापिनीत्वं च प्रयोजकं॥ निशीथश्च द्वितीययामांतस्तृतीययामादि मध्यवर्ति घ
टीद्वयमिति माधवः॥ अस्तानंतरं त्रिमुहूर्तात्मकः प्रदोषः॥ चतुर्नाड्यात्मक इति निर्णयामृतः॥
पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव॥ यत्तु उभयेद्युर्निशीथव्याप्तौ पूर्वैवेति हेमाद्रिः मदनो तत्र परेद्युः प्र
दोषनिशीथोभयव्याप्तिलाभात्॥ परेवेति माधवनिर्णयामृतौ॥ परेद्युरर्धरात्रैकदेशव्याप्तौ पू
र्वेद्युः संपूर्णतद्व्याप्तौ पूर्वैव॥ पूर्वेद्युर्निशीथव्याप्तौ परेद्युः प्रदोषव्याप्तौ पूर्वैव॥ परेति निर्णया
मृतः॥ यदा तु पूर्वेद्युर्निशीथानंतरं प्रवृत्ता परेद्युरर्वाक् निवृत्ता तदा प्रदोषव्यापित्वात्परा॥ दिनद्व
ये प्रदोषव्याप्तावव्याप्तौ च पूर्वैव॥ निर्णयामृतस्तु परेत्याह॥ पारणं तु चतुर्दशीमध्य एव कार्यं॥
यामत्रयाधिके तु तदुत्तरां तिथिमध्य एव॥ इति माघमासः॥ अथ फाल्गुनः॥ फाल्गुनपौर्णिमा हो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लिकापूजार्थं सायान्हव्यापिनी ग्राह्या॥ प्रदोषव्यापिनी वा॥ सा पूर्वविद्धा दिनद्वये प्रदोषव्याप्तौ परैव
तदभावे विपरीतेति निर्णयामृतः॥ पूर्वदिने भद्रायाः सत्वात् अन्ये तु भद्रामुखमात्रं त्यक्त्वा पूर्वदिन ए
व होलिकाकार्येत्याहुः॥ वस्तुतस्तु यदा तु पूर्वेद्युः संपूर्णरात्रौ भद्रा रहितः कालो न प्राप्यते परेद्यु
श्च प्रदोषे पौर्णिमाऽभावस्तदा भद्रामुखमात्रं त्यक्त्वा भद्रांपुच्छे होला कार्येति सर्वनिबंधकारव
चनानामाशयः॥ नीलकंठाशयोप्येवं॥ यदा तु रात्रौ सार्द्धप्रहरोत्तरं होलिका तदा तु तद्दिने भुक्त्वा
रात्रौ तु दीपनसमये स्नात्वा होलिकां संपूज्य प्रातः सुवासिन्यादिभोजयेदिति रुसतत्वात्॥ य
दा तु संपूर्णा पूर्वरात्रिर्भद्रया व्याप्ता उत्तरदिने प्रदोषे चंद्रग्रहणं तदा ग्रहणस्नानोत्तरमेव हो
लां पूजयेत् न तु पूर्वेद्युर्विष्टिपुच्छ इति कमलाकरनीलकंठावाहतुः॥ फाल्गुणकृष्णप्रतिपदि श्व
पचं स्पृष्ट्वा स्नायादिति तिथिनिर्णयसिंधुः॥ तद्दिने प्रातर्होलिकाभूमिविभूतिं च वंदयेत्॥ तथा त
द्दिने कुसुमप्राशनं च कुर्यात्॥ इति फाल्गुणमासः॥ अथ चैत्रकृष्णाष्टम्यां जानक्या उत्पत्तिः॥ इति
निर्णयोद्धारे विशेषतिथिनिर्णयः समाप्तः॥ अर्जितं भूरिकष्टेन पुस्तकं यत्नतो मया॥ हर्तुमिच्छति
यः पापी तस्य वंशक्षयो भवेत्॥१॥ संग्रहवचनं॥ आयान्तु सर्वे नमसो गृहें द्राः मंत्रैः कृतास्त्वाहु
तयः स्वनाम्ना॥ प्रागगा [illegible] मत्र कुमारः संतनु कंप यायामे॥२॥ तिथिवासरयो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्येगोयथाकालाभवेद्यदि ॥ प्रभादेवा ऽधर्मध्यानेऽपुण्यकालः सना ऽन्यथा ॥ ॥ ३५ श्रीर्जयति ॥

॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham